# ।।अथ ब्रह्म यामळोक्त नवग्रह समुच्चय शान्तिः।।

**नारदः --** पितामह महाप्राज्ञ सर्वलोक हिते रत। महाशान्तिं वद विभो सुगमांश्च समुच्चयात्।।
नवग्रहाणां सर्वेषां विस्तरात् श्रोतुमिच्छतः।

**ब्रह्मा --** शृणु नारद वक्ष्यामि लोकानां हितकाम्यया। यापृष्टातु त्वयाशान्तिः तामन्यो नवेत्तिहि।
त्रैवर्णिकानां साशान्तिः वेदमार्गेण चोदिता। अन्येषां तन्त्रतः कार्या साच विप्रमुखात्स्मृता।

**।।अथैते जप्य मन्त्राः।।**

कृत्तिकानक्षत्र मिति त्वष्टा हत पुत्र इति च। समिधो यजति वसन्तमनुवाका इमे त्रयः।।
शान्तिक्रिया चेदिष्टात्यै कार्या पुत्रादि काम्यया।आयनाय स्वाहेत्यादि प्रश्नशेषस्तथैव च।।
अनिष्टस्यापणोदार्थं क्रियते शान्ति कर्म चेत्। एकस्मै स्वाहेत्यादि प्रश्नशेषस्तथा विधः।।
ब्रह्मणे ब्राह्मण मिति प्रश्न स्संपूर्ण एव च। नवग्रहाणां प्रीत्यर्थं मेते जप्या विधानतः।।
नवग्रहाणां सूक्तं च रुद्र सूक्तं तथैव च। देवी सूक्तं च भू सूक्तं विष्णु सूक्तं तथैव च।।
नीळासूक्तं पौरुषंच सूक्तं नारायणं तथा। श्री सूक्तं पितृ सूक्तं च मृत्युसूक्तं तथैव च।।
सूक्तं तथा वारुणंच ब्रह्म सूक्तं च गारुडं। सद्योजातादि नवकं नमः प्राच्यै दिशे इति।।
पञ्चशान्तीर्घोषशान्तिंपठेयुश्च यथा क्रमम्।शनैश्चेन्मुख्यता शान्तौश्रीमद् वाल्मीकिकीर्तिते।।
वाचयेम्बाल चरितं शुक्रस्य यदि मुख्यता। वाचयेत् सुन्दर काण्डं प्रस्थ मात्रं तु गोपयः।।
निवेदयेत् सिता युक्तं तप्तं प्रति दिनं लघु। हस्त षट्क मितं पुष्प माल्यं श्वेतं सवासनम्।।
सीतार्पणाधियाग्रन्थे समर्प्या दावथान् ततः। द्वौ भागावर्पयेतत्र द्वाभ्यां स्त्रीभ्यां विशेषतः।।
भागं तृतीयं शिरसा धारयेत् भक्तिपूर्वकम्। बुधस्य चेत् भागवते पठेत् कृष्ण चरित्रकम्।।
रवेः स्कन्द पुराणोक्त मुमोद्वाहं पठेद्विजः। चन्द्रस्य चेन्मुख्य तास्या देवी भागवतं पठेत्।।
विशेषे णादिमं स्कन्धं सद्यो दुग्धं पयोर्पयन्न्। भौमस्य चेत् कुमारस्य पठेच्छूरवधादिकम्।।
गुरोश्चेत् सूतगीतांश्च ब्रह्मगीतां तथैव च। वाचयेद् भगवद् गीतां नैवेद्यं घृतमर्पयन्न्।।
राहोश्चेल्ललिताख्यानं ब्रह्माण्डान्तर्गतं पठेत्। मार्कण्डेय पुराण्स्थं देवी माहात्म्य मुत्तमम्।।
मधुक्षीरे निवेद्याद्यौ उष्णं क्षीर तथान्ततः। पठेत् केतोऽस्तु मुख्यत्वे पूर्वभागं पठेत् च्छुची:।।
श्रीमद् ब्रह्म पुराणस्य जप्यमेवं प्रकीर्तितम्। एवं पारायणं कृत्वा ततो होमं प्रकारयेत्।।
ऋत्विग्भिपूर्व मुक्तैस्तु समिदन्न घटत्रिकैः। युगपत् हूयमानैश्च प्रीणयेत्तु हुताशनं।।
स्वसूत्रोक्त विधानेन प्रतिष्ठाप्य हुताशनम्।तत्तद् ग्रह समिद्भिश्च घृतेन च मुखान्ततः।।
एकैकस्य ग्रहस्यार्थे त्रीम्स्त्रीन् विप्रान् प्रकल्पयेत्। समिदाज्य हविर्भिस्तु होतुमष्टोत्तरं शतं।।
हविर्गुडान्नं सूर्यस्य दुग्धान्नं शुक्रचन्द्रयोः। आढकान्नं तु भौमस्य बुधोमुद् गौदन प्रियः।।
घृतप्लुतं गुरोरन्नं तिलान्नं सूर्य सूनवे। माषान्नं तमसः प्रोक्तं मध्वन्नं च घृतान्वितम्।।
चित्रान्नं तु ध्वजस्योक्त मेवं हव्यानि कल्पयेत्। सप्तविंशति नक्षत्र देवतानामनुक्रमात्।।
होमान् कुर्याद्विधानेन समिदन्नाज्यतो दश। त्र्यंबकेन च सूर्यस्य देवीं वाच मृचा विधोः।।
कुजस्य स्योना पृथिवी गुरोस्यात्तु बृहस्पते। बुधस्य विष्णु गायत्र्या अश्वपूर्वां कवेरपि।।
तद्विष्णोरिति सौरेश्च राहोस्तामग्नि मन्त्रकः। प्रणोदेवीति केतोश्च जुहुयात्तु शतं शतम्।।
होमान्ते होम कर्तृभ्यः कृत्वा पाद प्रमाणकम्। आयुस्सूक्तेन जुहुत भो विप्राः प्रार्थयेदिति।।
ते केवलेन चाज्येन जुहुत् त्वष्टोत्तरं शतम्। अथहोमस्य साद्गुण्य हेतवे स्वर्ण दक्षिणां।।
समाप्ते तूत्तरेतन्त्रे असमाप्तेऽग्नि पूजने। दद्याद्विजेभ्यस्तत्रैव प्रणम्य विधिपूर्वकम्।।
**अष्टोत्तर शते नादौ नाम्नां संपूज्य वैग्रहान् । सहस्रनामभिश्शंभोर्गुरुं सूर्यं च पूजयेत्।**
**देव्या नाम सहस्रेण शीतरश्मिं समर्चयेत्। गुहस्यनाम साहस्रैः पूजयेत् भूमिनन्दनम्।।**
**विष्णोर्नामसहस्रेण शनिं सौम्यं च पूजयेत्। अर्चयेदसुराचार्यं लक्ष्मीनाम सहस्रतः।**
**दुर्गाया ललिताया वा नामसाहस्रतस्तमः। ब्रह्म नाम सहस्रेण शंभोर्वा केतु मर्चयेत्।।**

।।अथैते जप्य मन्त्राः।।

## सूर्यस्य संहितायां

(१) इन्द्रंव्वो विश्वतस्परि १ ६ १२
(२) अयज्ञोवाएषः १ ५ ७
(३) आदित्यं चरुं २ २ ६
(४) अर्यम्णे चरुं २ ३ ४
(५) मानोमित्रो वरुणः ४ ६ ८
(६) वैष्णव्यर्चा हुत्वा ६ ३ ३

### ब्राह्मणे

(१) प्रजापतिर्वाचस्सत्य १ १ ५
(२) मित्रोसिवरुणासीत्याह १ ७ १०
(३) तस्यवा अग्नेर्हिरण्यम् २ ३ ४
(४) मित्रोसिवरुणोसि २ ६ ५
(५) यद्येवादेवहेडनम् २ ६ ६
(६) सूर्योदेवी मुषसं २ ८ ७

## अथ चन्द्रस्य संहितायां

(१) वरुण९ सुषुवाणं २ १ ९
(२) प्रजापतेस्त्रयस्त्रि९शत् २ ३ ५
(३) अग्नेर्मन्वे प्रथमस्य ४ ७ १५
(४) वसोर्धाराञ्जुहोति ५ ४ ८
(५) मित्रं देवा अब्रुवन् ६ ४ ८
(६) प्रजापतिरकामयत ७ २ ५
(दशहोतारं)

### ब्राह्मणे

(१) अनुमत्यैपुरोडाशं १ ६ १
(२) प्रजापतिरिन्द्रमसृजत २ २ १०
(३) सोमोराजामृत९सुतः २ ६ २
(४) सि९हेव्याघ्रउतया २ ७ ७

## अथ भौमस्य संहितायां

(१) वैश्वानरोन ऊत्या १ ५ ११
(२) बार्हस्पत्य९ शितिपृष्ठं २ १ ६
(३) अन्नपतेन्नस्य ४ २ ३
(४) यइमा विश्वाभुवनानि ४ ६ २
(५) ऋक्सामेवै ६ १ ३
(६) आपोवाइदमग्रे ७ १ ५

### ब्राह्मणे

(१) वृषासोअ९सुः २ ४ ५
(२) धृष्टिरसि ब्रह्मयच्छेत्याह ३ २ ७
(३) दिवश्शिल्प मवततं ३ ३ २
(४) अग्निर्मूधादिवःककुत् ३ ५ ७

## अथ बुधस्य संहितायां

(१) अग्निंवा एतस्य २ ३ ११
(२) विष्णोः क्रमोसि ४ २ १
(३) विष्णुमुखावैदेवाः ५ २ १
(४) त्वष्टा हत पुत्रः २ ४ १२
(५) विश्वरूपोवैत्वाष्ट्रः २ ५ १
(६) अग्निं युनज्मि शवसा ४ ७ ३
(७) अग्ने तव श्रवो वयः ५ २ ६
(८) बद्धमवस्यति ६ २ ९
(९) इन्द्रोवृत्रायवज्रमुदयच्छत् ६ ५ १

### ब्राह्मणे

(१) सोमस्यत्विषिरसि १ ७ ८
(२) जुष्टीनरो ब्रह्मणावः २ ४ ३
(३) व्याघ्रो यमग्नौ २ ७ १५
(४) विवाएष इन्द्रियेण ३ ७ १३
(५) सावित्रमष्टा कपालम् ३ ८ १२

## अथ गुरोः संहितायां

(१) आश्विनं धूम्रललामं २ १ १०
(२) ऐन्द्रं चरुं २ २ ७
(३) हिरण्यगर्भ आपोह २ २ १२
(४) देवसवित रेतत्ते ३ २ ७
(५) रुद्राध्याय समग्रः ४ ५ ०
(६) ब्रह्मजज्ञान मिति रुक्मं ५ २ ७
(७) अपां गृहान् ५ ६ २
(८) बृहस्पतिर्देवानां ६ ४ १०

### ब्राह्मणे

(१) ऋतमेव परमेष्ठी १ ५ ५
(२) देवस्याह९ सवितुः १ ३ ६
(३) रत्निनामेतानि १ ७ ३
(४) आरण्यके ब्रह्मन्
प्रचरिष्यामः।। भूः प्रपद्ये।।

## अथ शुक्रस्य संहितायां

(१) अन्वहमासाः १ ७ १३
(२) अयज्ञो वा एषः २ ५ ८
(३) यो वै देवान् ३ १ ९
(४) अग्निर्वृत्राणि ४ ३ १३
(५) समिद्दिशां ४ ४ १२
(६) गायत्रोवै ७ २ ८

### ब्राह्मणे

(१) होतायक्षत् समिधाग्नि
मिडस्पदे २ ६ ११
(२) ते शुक्रास्सश्शुचयः २ ८ २
(३) आदेवोयातु २ ८ ६
(४) सक्षेदंपश्य ३ ७ ७
(५) यदस्यपारे ३ ७ ८

## अथ शनैश्चरस्य संहितायां

(१) मम नाम प्रथमं १ ५ १०
(२) अग्नेस्त्रयो २ ६ ६
(३) भक्षेहिमाविश ३ २ ५
(४) यावतीवै ५ २ ३
(५) प्राचीनव९शं ६ १ १

### ब्राह्मणे

(१) प्रजावैसत्रमासत १ ४ ९
(२) उद्धन्यमानं १ २ १
(३) इन्द्रोवृत्र९ हत्वा १ ३ १०
(४) अग्नये देवेभ्यः १ ६ ९
(५) सुरावन्तं २ ६ ३

## अथ राहोः संहितायां

(१) आददे ग्रावेति प्रश्न समग्रः १ ४ ०
(२) देवीरापस्सं १ ८ १२
(३) उत्क्रामोदक्र मीदिति ५ १ ३
(४) विवाएतौ द्वि षाते ५ २ ४
(५) कद्रूश्चवै ६ १ ६
(६) सोत्तर वेदिः ६ २ ८
(७) दैवावै यद्यज्ञे कुर्वत ६ ४ ११
(आग्रयणाग्रान्)

### ब्राह्मणे

(१) देवीरापस्सं १ ७ ६
(२) आनोभर भगमिन्द्र २ ५ ४
(३) घृतं च वै ३ ३ ४
(४) सर्वान् वै ३ ७ १
(५) अनागसस्त्वावयम् ३ ७ ९

## अथ केतोः संहितायां

(१) देवावै मृत्योः २ ३ २
(२) देविका निर्वपेत् ३ ४ ९
(३) ब्रह्मवादिनो वदन्त्यद्भिः २ ६ ५
(४) प्रजापतिरग्नि मचिनुत ५ ६ ६
(५) देवस्यत्वा सवितु प्रसव --
-- इत्यभ्रिमादत्ते ६ २ १०
(६) प्रजापतिरकामयत
दश होतारं ७ २ ५

### ब्राह्मणे

(१) तस्यावाचोव पादाद १ ५ १२
(२) अन्तोवा एष यज्ञस्य २ २ ६
(३) प्रजापतिप्रजा असृजत २ २ ७

**।।इति ब्रह्म यामळोक्त नवग्रह समुच्चय शान्तिः।।**